# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - आचार्यप्रथमवर्षम्, सत्र-१ | **प्रश्नपत्रम् – ५**<br>(C.E.4.1.1- New & Old)<br>पञ्चदशी ( ४-६ प्रकरणानि ) | गुणाः - ७० |
|---|---|---|
| विषयः - सर्वदर्शनम् ( ऐच्छिकम् ) | | |
| दिनाङ्कः - १९/१२/२०१८ | | समयः - ०२:०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ कस्यचिद् एकस्य श्लोकस्य यथाग्रन्थं व्याख्यां लिखत ।** **( ०५ )**

*(१) चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः ।*
*चिच्छाया लिङ्गदेहस्था तत्सङ्घो जीव उच्यते ॥*

*(२) मैवं मांसमयी योषित्काचिदन्या मनोमयी ।*
*मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी ॥*

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) जीवसृष्टद्वैतस्य कथनं कुरुत ।*

*(२) ईशसृष्टिः न ज्ञानबाधकम् अपितु ज्ञानसाधकम् इति यथाग्रन्थं स्पष्टयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां लिखत ।** **( ०५ )**

*(१) चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।*
*चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि ॥*

*(२) स्वतश्चिदन्तर्यामी ते मायावी सूक्ष्मसृष्टितः ।*
*सूत्रात्मा स्थूलसृष्टैव विराडित्युच्यते परः ॥*

**प्रश्नः ४ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं निबध्नीत ।** **( १० )**

*(१) ''अहं ब्रह्मास्मि'' इति महावाक्यस्य अर्थं विवर्ण्य महावाक्यार्थविचारम् उपस्थायत ।*

*(२) चित्रपटदृष्टान्तेन परमात्मनः अवस्थाचतुष्ट्यं उपपादयत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां कुरुत ।** **( ०५ )**

*(१) आनन्दमयकोशो यः सुषुप्तौ परिशिष्यते ।*
*अस्पष्टचित्स आत्मैषां पूर्वकोशोऽस्य ते गुणाः ॥*

*(२) सत्यं ज्ञानमनन्तं यद् ब्रह्म तस्मात्समुत्थिताः ।*
*खं वाय्वग्निज्योव्योषध्यन्नदेहा इति श्रुतिः ॥*

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

*(१) ईश्वरस्य जगत्कारणत्वं स्पष्टयत ।*

*(२) जगतः सृष्टिः कथं भवतीति ग्रन्थोक्तदिशा स्पष्टयत ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्यचिदेकस्य श्लोकस्य यथाग्रन्थं व्याख्यां लिखत ।** **( ०५ )**

*(१) यदा सर्वे प्रभिद्यन्ते हृदयग्रन्थयस्त्विति ।*
*कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषतः ॥*

*(२) जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितम् ।*
*मायया तदुपेक्ष्यैव चैतन्यं परिशेष्यताम् ॥*

**प्रश्नः ८ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं निबध्नीत ।** **( १० )**

*(१) भारतीयदर्शनेषु वेदान्तदर्शनस्य वैशिष्ट्यं वर्णयत ।*

*(२) ''ज्ञानदेव कैवल्यम्'' इति वेदान्तसिद्धान्तं स्पष्टयत ।*

**प्रश्नः ९ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तरं लिखत ।** **( १० )**

*(१) पञ्चदशीकारः कः ?*

*(२) पञ्चदश्यां कति प्रकरणानि सन्ति ?*

*(३) पञ्चमप्रकरणस्य नाम किम् ?*

*(४) द्वैतं कतिविधम् ?*

*(५) पिता कति अन्नानि अजनयत् ?*

*(६) जगत् कस्य कार्यम् ?*

*(७) किं नाम महावाक्यम् ?*

*(८) ''तत्त्वमसि'' इति महावाक्यं कस्य वेदस्य ?*

*(९) ''अहं ब्रह्मास्मि'' इति महावाक्यं कस्य वेदस्य ?*

*(१०) षष्ठप्रकरणस्य नाम किम् ?*

*(११) सूक्ष्मसृष्टितः परमात्मा किं उच्यते ?*

*(१२) शारीरकभाष्यं केन लिखितम् ?*

*(१३) विद्या कतिविधा ?*

*(१४) अज्ञानस्य शक्तिः कतिविधा अस्ति ?*

*(१५) जीवस्य कति अवस्थाः भवन्ति ?*

--oo--